राधासहस्रनाम-स्तोत्र

खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

॥ राधासहस्रनामस्तोत्र ॥

❀❀❀❀❀

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

संस्करण : फरवरी २०१३, सम्वत् २०६९ सादा गुटका : १५रुपये मात्र ।
रेशमी जिल्द : २५ रुपये मात्र।

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.
Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass, Prop. Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune -411 013.

राधाकृष्णाभ्यां नमः



॥ राधासहस्रनामस्तोत्रप्रारम्भः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीशिव उवाच ॥

अथातः संप्रवक्ष्यामि राधानामसहस्रकम् ॥
शृणु नारद भद्रं ते गोपनीयं प्रयत्नतः ॥१॥
प्रातः सायं निशीथे वा पठितव्यं मुमुक्षुभिः ॥
त्रिराचम्य शुचिर्भूत्वा यो जपेत्सुसमाहितः ॥२॥

स वैष्णवो विशुद्धात्मा जायते नात्र संशयः ॥
बहु किं पठनादस्य भवेद्विष्णुसमः पुमान् ॥३॥
मासैकपठनादस्य भवेत्सर्वार्थसिद्धिदः ॥
मासद्वयेन देवर्षे भवेद्वैवैष्णवोत्तमः ॥४॥
सोऽम्बरीषः स प्रह्लाद उद्धवः स युधिष्ठिरः ॥
स भीष्म अर्जुनश्चैव स्तवराजं पठेत्तु यः ॥५॥
अथ किं बहुनोक्तेन वर्णनेन पुनः पुनः ॥
यद्यदिष्टतमं लोके तत्तदाप्नोति साधकः ॥६॥

रहस्यं कथयाम्यद्य यद्वै नामसहस्रकम् ॥
इदमेव पुरा पृष्टः कृष्ण उद्धवमूचिवान् ॥७॥
श्रीराधा राधिकाऽऽराध्या राधाकृष्णशिवादिभिः ॥
गोपिका गोपराज्ञी च गोपानन्दविधायिनी ॥८॥
गोपपूज्या गोपहृष्टा गोपगोपीभिरावृता ॥
गोपाह्लादकरी गोपी गोपा गोपशिवङ्करी ॥९॥
सुन्दरी सुन्दराकारा सुन्दरोत्तमवन्दिता ॥
सुन्दरानन्दसंहृष्टा सुन्दरी बहुभाविनी ॥१०॥

सौन्दर्यनिलया रामाभिरामा बहुमानिता ॥
श्यामा श्यामप्रियाऽश्यामा श्यामाभिवन्दिता नवा ॥११॥
ललिता ललिताचारा ललिताचारशालिनी ॥
कृष्णा कृष्णकृपाकर्त्री कृष्णानन्दपरायणा ॥१२॥
कृष्णप्रिया कृष्णपूज्या कृष्णाकर्षणकारिणी ॥
कृष्णाराध्या कृष्णवंद्या कृत्स्नवर्त्मनि बुद्धिदा ॥१३॥
कृष्णपूजनसर्वस्वा कृष्णदर्शनतत्परा ॥
श्रीकृष्णपदसर्वस्वा कृष्णकृष्णेतिवादिनी ॥१४॥

श्रीकृष्णैकान्तसक्ता च कृष्णप्रेमविवर्द्धिनी ॥१५॥
विशेषा च विशेषज्ञा बल्लवी बल्लभार्चिता ॥
बल्लवीनां च हार्दज्ञा बल्लवीनां सुखावहा ॥१६॥
रासमण्डलमध्यस्था रासकेलिकलोत्सुका ॥
श्रीकृष्णालिङ्गितभुजा रासक्रीडाभिनन्दिनी ॥१७॥
वृषभानुसुता राधा वृषभानुसुखप्रदा ॥
वृषभानुसुता देवी कीर्त्यानन्दप्रदायिनी ॥१८॥

वृषभानुसुता तन्वी वृषभानोः कुलध्वजा ॥
सर्वागमप्रिया सर्वाचारतत्परमानसा ॥१९॥
प्रजासञ्जीवनी जीवनौषधी परमामृता ॥
प्रजासेव्या प्रजावन्द्या व्रजमानुषमुक्तिदा ॥२०॥
सौदामिनी दामप्रिया तपोयुक्ता तपोनिधिः ॥
तापसी गीतगुणका तापसानां गतिप्रिया ॥२१॥
तपःकर्त्री तपोयुक्ता तपोमूर्तिस्तपोमयी ॥
तपसां सिद्धिदा सिद्धा सिद्धाचारविचारिणी ॥२२॥

सिद्धागमा च सिद्धाख्या सिद्धिदात्री सुखावहा ॥
सुखदा सुखसंहृष्टा सुखाकारा सुखालया ॥२३॥
सखिभिः सेविता सेव्या सेवकानां शिवङ्करी ॥
सेवकासेवितपदा सेवकार्पितमानसा ॥२४॥
मनोवेगा मनोरूपा मनोगतिविडम्बिनी ॥
मनसः प्रेमका माया मायामयविनाशिनी ॥२५॥
मोक्षदा मोक्षमार्गज्ञा मोक्षमार्गप्रकाशिनी ॥
मोक्षरूपा मोक्षगृहा कर्त्री मोक्षस्य जाह्नवी ॥२६॥

जह्नुकन्या जलावासा जलाधीशा जलप्रिया ॥
समुद्रगा विहङ्गा च गङ्गा शिवशिरःस्थिता ॥२७॥
शिवरूपा शिवकरी शिवहृद्या शिवंवदा ॥
शिवप्रिया शिवगतिः शिवमार्गरतिप्रदा ॥२८॥
शिवाचारप्रिया गुर्वी गुप्तिर्गुप्तगतिर्नृणाम् ॥
गुप्ता गुप्ततरा गोप्या गोप्यविद्भिः समर्चिता ॥२९॥
गुप्तालया गुप्तरूपा गुप्तमार्गप्रवर्तिका ॥
लक्ष्मीह्रीश्रीदयामूर्तिस्तुष्टिः पुष्टिः स्तुतिः प्रभा ॥३०॥

क्षमा मेधा सुधा विद्या शुद्धिर्बुद्धिर्धृतिर्गतिः ॥
प्रचण्डचण्डमुण्डघ्नी रक्तबीजविनाशिनी ॥३१॥
मथुरा द्वारका काञ्ची माहिष्मत्यथ कौशिकी ॥
अयोध्याकर्णिकाकाशीवासिनी कर्मवर्द्धिनी ॥३२॥
शान्ता शान्तिकरी पुष्टा शान्तविज्ञानदायिका ॥
शान्तिरूपा सदा साङ्गा साङ्गोपाङ्गगतिप्रिया ॥३३॥
मनोहरा मनोज्ञा च मनोवृत्तिप्रकाशिनी ॥
मनोकान्तिभ्रमकरी भ्रामरी भ्रमकारिका ॥३४॥

जगद्भ्रमणधारा च जगतो भुक्तिकारिणी ॥
जगन्माता जगद्धात्री जगज्जीवनजीविका ॥३५॥
जगन्मूर्तिर्जगद्देहा जगतां जीवनौषधी ॥
जगतां बुद्धिसन्दात्री जगतां बुद्धिहारिणी ॥३६॥
माया मुद्रा महाविद्या महायोगीश्वरी मही ॥
योगयुक्ता योगविद्या योगाङ्गा योगवल्लभा ॥३७॥
योगविद्येश्वरी योग्या युक्ताहारा सुखान्विता ॥
योगैकसाध्या योगाद्या योगक्षेमप्रवाहिका ॥३८॥

वृन्दावनप्रिया वृन्दा वृन्दावनविहारिणी ॥
वृन्दावनकृतालास्या वृन्दावनवरार्चिता ॥३९॥
वृन्दावनस्थजंतूनां सर्वतोभद्रकारिणी ॥
वृन्दावनरसोत्कण्ठा वृन्दावनकृतालया ॥४०॥
वृन्दावनप्रभावज्ञा वृन्दावनसुपूजिता ॥
वेणुवादरता वेणुनादिनी कलभाषिणी ॥४१॥
वैष्णवी विष्णुनिरता विष्णुमाया वसुन्धरा ॥
वसुदा वसुकृद्रामा विष्णुवामाङ्गवासिनी ॥४२॥

विष्णुभक्तैः सदा सेव्या विष्णुभक्तहितैषिणी ॥
विष्णुविद्या विष्णुरूपा विश्वज्ञा च विवेकिनी ॥४३॥
विवेकदायिका साध्वी सम्यक्साधुजनार्चिता ॥
सम्यग्ज्ञानपरा सम्यक् सम्यग्विद्याविशारदा ॥४४॥
सारदा शारदा साध्या शरत्पूर्णनिभानना ॥
शराह्वया सदाह्लादकारिणी जयदा मता ॥४५॥
माता मातामही मन्त्रा मूर्तिवन्द्या पितामही ॥
अर्थैश्वर्य्यकरी प्रज्ञा ब्राह्मी नारायणी दया ॥४६॥

पुण्यापुण्यविधानज्ञा पुण्यदेवद्विजार्चिता ॥
पुण्यमूर्तिः पुण्यदेहा पुण्यग्रामनिवासिनी ॥४७॥
गोकुलस्य प्रिया देवी गोकुले सर्वनर्मदा ॥
गोकुलाचारसर्वज्ञा गोकुलस्य सुखार्थिनी ॥४८॥
गोकुलीयैः सदा ध्येया गोकुलाय गतिप्रदा ॥
गोकुलाचारविदुषी गोकुलाचारवर्णिनी ॥४९॥
सुरारिदमनी दिव्या सुरवृन्दविनाशिनी ॥
दुष्टदानवसंहर्त्री कंसचाणूरमर्दिनी ॥५०॥

कुमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ॥
पाञ्चाली द्रौपदी सीता तारा सैब्याऽथ रुक्मिणी ॥५१॥
सत्यभामा तथा सत्या सत्यधर्मपरायणा ॥
बृहती च तथा स्थूला सूक्ष्मा ह्रस्वा च दीर्घिका ॥५२॥
यशोदा देवकी चित्तिरन्तःसंलग्नमानसा ॥
रोहिणी कुब्जिका गुर्वी किशोरी षोडशाब्दिका ॥५३॥
चित्रिणी चित्रभावज्ञा चित्रकर्मकरी सदा ॥
विचित्राभरणा नन्दव्रजसौभाग्यवर्द्धिनी ॥५४॥

नन्दस्तुता नन्दप्रिया नन्दानन्दकरी मही ॥
नन्दादिगोपैः प्रणता नन्दस्मरप्रभावती ॥५५॥
यमुनाकृतसंक्रीडा यमुनारूपधारिणी ॥
यमुनायां सदास्नाता यमुनारामकारिणी ॥५६॥
गुणाढ्या गुणदा गुण्या त्रिगुणा गुणनिर्वृता ॥
गुणान्विता गुणमयी गुणग्रामनिवासिनी ॥५७॥
गोपस्त्रीभिः परिवृता गोपकन्याविनोदिनी ॥
गोपस्त्रीणां पराशक्तिः परमामृतवर्षिणी ॥५८॥

परमानन्दसन्तुष्टा ब्रह्मानन्दमयीश्वरी ॥
ब्रह्मानन्दप्रिया ब्रह्मवादिनी ब्राह्मणप्रिया ॥५९॥
सरस्वती त्रिवेणी च पुष्करा पुष्करालया ॥
त्रयीमयी स्मृतीमयी वेदमार्गविभूषणा ॥६०॥
वेदमार्गरता वेदवेद्याविद्वत्सु पूजिता ॥
पुराणगीतगुणांका पुराणव्रतशोभना ॥६१॥
पुराणातिपुराणाम्बा पुराणपरमार्थदा ॥
भूता भूतप्रिया भूतग्रामपालनमानसा ॥६२॥

भूतवर्गधरा भूतपोषणव्रतपालिका ॥
भूतानन्दकरी भूतमाता धात्री धृतिः क्रिया ॥६३॥
भूतप्राणप्रिया भूतरक्षिका भूतदर्पहा ॥
सर्वाणी सर्वदा सार्वी सर्वमोहविधायिनी ॥६४॥
सर्वसङ्कटसंहर्त्री सर्वसिद्धिसमन्विता ॥
सर्वधारा सर्वमयी सर्वरूपा सदानवा ॥६५॥
सर्वशक्तिः परं ज्योतिः सर्वशस्त्रप्रणाशिका ॥
रागिणी रागजननी रागभूमिर्दृढव्रता ॥६६॥

रागवश्या वीतरागा सर्वरागानुरागिणी ॥
धर्मदा धर्मधारा च धनदा धान्यदा शुचिः ॥६७॥
भोगमुक्तिव्रतधारा भोगमुक्तिस्वरूपिणी ॥
पावनी पावनगुणा पामराणां च पावनी ॥६८॥
पावनश्राविणी शश्वत्पावनश्रवणात्मिका ॥
पार्वती पर्वतसुता पर्वतेषु विहारिणी ॥६९॥
श्रीकृष्णान्वेषणपरा कृष्णदर्शनलालसा ॥
तत्त्वात्मिका तत्त्वभावा तत्त्वानां तत्त्ववर्द्धिनी ॥७०॥

तत्त्वानुरागिणी बाला तत्त्वाकर्षणकारिणी ॥
तत्त्वोत्पत्तिविधानज्ञा तत्त्वानां नाशकारिणी ॥७१॥
तत्त्वविद्भिः सदा ध्याता तत्त्वविन्मोक्षदायिका ॥
तत्त्वविद्विघ्नशमनी तत्त्वविद्याधिकारिका ॥७२॥
तत्त्ववित्प्रदसर्वस्वा तत्त्ववित्प्राणरक्षिका ॥
शङ्खिनी शङ्खहस्ता च शङ्खनादकरी प्रिया ॥७३॥
चक्रिणी चक्रवृत्तिज्ञा दुष्टचक्रक्षयङ्करी ॥
शूलिनी शूलहस्ता च भक्ताशूलकरी सदा ॥७४॥

गदनिगदसंहर्त्री अङ्गदाकारजीविनी ॥
सदाचाररता साध्वी सदाचारप्रकाशिनी ॥७५॥
सदाचारासदाचारदूरकर्त्री सदार्तिहा ॥
सदाचारविशेषा च सदाचारप्रमाणिका ॥७६॥
सङ्केतनिरता लोला सङ्केतसुसमाहिता ॥
सङ्केतस्वामिनी श्यामा! सङ्केतप्रीतिदा शुभा ॥७७॥
सुसङ्केतकृतक्रीडा सङ्केतकृतनिश्चया ॥
रामा रामागता रामप्रिया दुःखादिभञ्जिका ॥७८॥

पद्मा पद्ममुखी पद्मवासिनी पद्मभूषणा ॥
पद्मालया पद्महस्ता पद्माक्षी पद्मिनी पुरी ॥७९॥
पद्मवर्णा पद्मगर्भा पद्मनाम्नी महानिधिः ॥
रुक्माङ्गपा रुक्मपर्णा रुक्मदात्री च निर्भया ॥८०॥
रुक्माधारा रुक्मरुक्मरुक्मिणी रुक्मप्रीतिदा ॥
कामिनी कामभूः काम्या कमनीया कुटुम्बिनी ॥८१॥
कमनीयस्वभावाद्या करुणाकारिणी कुरुः ॥
कामरूपा काम्यमाना कामदेवकृपाधरा ॥८२॥

कालकर्त्री कला कल्या कलिनी कुलभामिनी ॥
तुलसी च तुला तन्द्रा तोतला तारका ध्वनिः ॥८३॥
तनुका तालवद्दीर्घा तारिणी तामसी नवा ॥
रम्भा तिलोत्तमा रम्या रमणीया वसुन्धरा ॥८४॥
कोकिला कलनिर्ह्लादा कलकण्ठी कलासुधा ॥
सुधापानमहानन्दा शुद्धाचारपरायणा ॥८५॥
सुधासमुद्रलहरी सुधासिन्धुनिवासिनी ॥
सुधामयी सुधामूर्तिः सुधाकान्तिः सुधाह्वया ॥८६॥

सुधीभिर्वन्दिता शुद्धा शुद्धाङ्गी शुद्धकर्मदा ॥
शुद्धमार्गरता शुद्धकारिका भक्तवत्सला ॥८७॥
भक्तागमनसाकाङ्क्षी भक्तकीर्तिविधायिनी ॥
सुषुम्ना च सुषामा च सुषमा परमा मता ॥८८॥
इडा चेड्या महद्धिः सा सूर्यवाहा सुशर्मदा ॥
चन्द्रादित्यकला ज्योतिः सूर्यचन्द्रसुकुण्डला ॥८९॥
सूर्यमण्डलमध्यस्था चन्द्रमण्डलमानिता ॥
सूर्याग्निधाम्नी सर्वेषां धाम्नी धात्री धरित्रिणी ॥९०॥

लज्जा लज्जावती लज्जा पूरिणी क्लेशनाशिनी ॥
नानारूपधरा नानाव्याधिनाशनतत्परा ॥९१॥
नानागमरहस्या नानासाधनसाधिका ॥
नानामन्त्रविधानज्ञा नानामन्त्रस्वरूपिणी ॥९२॥
नानाभूषणभूषाङ्गी नानावस्त्वर्थगामिनी ॥
नानानाट्यकलाभिज्ञा नानाश्लाघार्थज्ञापिका ॥९३॥
नानाकर्मकरी नानाकर्ममार्गविधायिका ॥
तीर्थनाम्नी भीतिहरा तीर्थश्रवणशोधिता ॥९४॥

तीर्थस्थितालङ्कारणा तीर्थाश्रितसुखोन्मुखी ॥
निरञ्जना निरालम्बा निराधारा निराश्रया ॥९५॥
निरीहा निस्पृहा नारी निर्द्वन्द्वा निरहंकृतिः ॥
निर्गुणा गुणसम्मुक्ता निर्भ्रमा भ्रमवर्जिता ॥९६॥
गरुडासनगामीया गारुडी गरुडार्चिता ॥
गरुडस्कन्धसंस्थाना गरुडार्तिविनाशिनी ॥९७॥
भावपूजकसर्वस्वा भावनिन्दकनाशिनी ॥
भावानुगा च भाव्यज्ञा भावाभावस्वरूपिणी ॥९८॥

भूताभूतभविष्यादिज्ञानकर्त्री भवार्तिहा ॥
चार्वङ्गी चतुरा चित्या चञ्चला चञ्चरीध्वनिः ॥९९॥
चामुण्डा चारुचरणा चिरचारणमोदिता ॥
वामनी वर्तुलमुखी वृत्तिर्वृतान्तसेविता ॥१००॥
प्रकृत्तिकारिणी प्राप्तिः प्राची प्राणाशुरक्षिणी ॥
प्राणप्रतिष्ठा प्राकाम्या परमाणुप्रमाणिका ॥१०१॥
परमा परमोत्कृष्टा परमाण्वी पराशरा ॥
परभागवतैर्ध्याता परभागवताभिधा ॥१०२॥

श्रीभागवतहार्दिक्या श्रीभागवतमानसा ॥
श्रीभागवतनिष्ठा च श्रीभागवतभाविता ॥१०३॥
श्रीभागवतसंविज्ज्ञा श्रीभागवतभाषिता ॥
सावित्री श्रीसच्चिद्रूपा सवितुः सुगतिप्रदा ॥१०४॥
सवित्राराधितपदा सचिन्मण्डलमण्डिता ॥
कल्पान्तस्थापिनी कल्पकल्पिता कल्पनाकुला ॥१०५॥
कल्पकल्पायुषः कल्पकरी कल्पप्रभञ्जिका ॥
मन्वन्तरी प्रिया मन्वी मन्वन्तरमनुप्रिया ॥१०६॥

शतरूपा शतगुणा शताक्षी च शकुन्तिनी ॥
सहस्राक्षी दशशतभुजार्पितमहायुधा ॥१०७॥
सहस्र शिरसी माता सहस्रचरणैर्युता ॥
सहस्रदलपद्मान्तः बद्धपद्मासनार्चिता ॥१०८॥
षट्कोणयन्त्रनिलया षट्कोणस्थापितप्रभा ॥
त्रिकोणगृहमध्यस्था त्रिकोणे पूजिता शुभा ॥१०९॥
तुरीया चत्वरा तन्त्री तन्त्रीस्वरविडम्बिनी ॥
तन्त्रगीता तन्त्रसेव्या तन्त्रोक्ता तान्त्रिकी स्मृतिः ॥११०॥

तन्त्रविद्या स्वतन्त्रा च परतन्त्रा प्रियानदी ॥
स्मृतिसंस्कारजननी संस्कृतिः संस्कृता पुरा ॥१११॥
संन्ध्याध्यानरतिः शङ्का शक्तिः सर्वेषु जन्तुषु ॥
सौम्या सोमानना सौम्यमार्गबुद्धिप्रदा नृणाम् ॥११२॥
सौम्यागमकरी शुद्धा सौम्यवार्ताविधायिनी ॥
सौम्यमूर्तिः सौम्यदेहा सौम्याचारविशेषिका ॥११३॥
सौम्याराध्या सौम्ययुक्ता सौम्यपूजकपुत्रिणी ॥
गुर्वी गुरुविधा गौरी गोरोचनविभूषणा ॥११४॥

गुरुभक्ता गुरुकुला गुरुज्ञाना गुरुस्पृहा ॥
गुरुतालविशेषज्ञा गुरुपूज्या गुहालया ॥११५॥
सामज्ञा सामगा सामविदितस्वार्थसाधना ॥
शची सरस्वती दिव्यारुन्धती प्रमदोत्तमा ॥११६॥
जयदा जित्वरा याम्या जयजाप्या जपान्तिका ॥
हविष्याहुतिभोक्त्री च हविर्धानी मुनिप्रिया ॥११७॥
होत्री होमक्रिया होमसन्तुष्टा होमवत्सला ॥
यजुःप्रिया यजुर्माता यजुर्वेदप्रणालिका ॥११८॥

यजुर्वेदाभिलाषा च यजुर्वेदकृपाकरी ॥
ऋचां सारार्थविदुषी ऋग्यजुःसामगायनी ॥११९॥
सामदानमितानन्दा सामगेया च सामगा ॥
सामा सामप्रिया सिद्धिः समाधिर्निरतप्रिया ॥१२०॥
समाधिशास्त्रश्रवणा समाधिर्व्याधिनाशिनी ॥
विजया विश्वमाता च जयन्ती वीरबाहुका ॥१२१॥
शत्रुघ्नी शाम्बरी सेनाक्षौहिणी दलहारिणी ॥
मञ्जीरपदका कण्ठे हारमाला कराङ्कशा ॥१२२॥

भुजङ्गदागदहरा गदपीडाक्षयङ्करी ॥
शङ्खचक्रगदाखड्गनिकुरम्बानि बिभ्रती ॥१२३॥
गोपिनीद्रावणकरी द्रवणाख्या सुसंस्कृतिः ॥
वीरभूमिर्वीरजनी वीरपालनमानसा ॥१२४॥
वीराकृतिर्वीरमुखी वीरविद्याविशारदा ॥
वीरा वीरवती वीरवर्णिनी वीरसुन्दरी ॥१२५॥
क्रोधिनी क्रोधसंविग्ना क्रोधवश्यकरी प्रभा ॥
गोमती गोधना गङ्गा गोवर्धनगिरिप्रिया ॥१२६॥

गोवर्धनधराशक्तिः - गोपालनपरव्रता ॥
हैयङ्गवीनरसिका रसोत्कृष्टा रसायना ॥१२७॥
विरागिणी विरागा च पूर्णवैराग्यदायिनी ॥
सरागा वीतरागा च विरागा रागसंयुता ॥१२८॥
वैराग्यजननी साक्षात् कृष्णभक्तिशरीरभृत् ॥
वैराग्याङ्गविधेः कर्त्री वैराग्यसुखसागरा ॥१२९॥
मृत्युदा पापिवृन्दानामायुर्दा धर्मधारिणाम् ॥
सुभङ्गदा हि दुष्टानां सुष्टानां ज्ञानभक्तिदा ॥१३०॥

भयदा प्रेतभूतानां साधूनामभयप्रदा ॥
शिवदा शिवकर्तॄणां पामराणां क्षयङ्करी ॥१३१॥
योगिनां योगदा रूपधारणाध्यानतत्परा ॥
बहिर्मुखानामशुभङ्करिका वाग्विलासिनी ॥१३२॥
यशोदा च यशोरूपा यशसांवृद्धिदा मुखी ॥
लोकवेदविधिप्रौढा लोकवेदप्रलोभिनी ॥१३३॥
लोकवेदरता लोकवेदाचारप्रवाहिका ॥
लोकवेदमया भर्त्री लोकवेदशुभप्रिया ॥१३४॥

लोकवेदैः पूज्यतमा लोकवेदव्रतस्तुता ॥
छाया संज्ञानुसूर्या च ब्रह्माणी च मदालसा ॥१३५॥
महाह्लदा महावापी परिखा च महाखनिः ॥
प्राकारवलया चैव योगपद्मधरा गया ॥१३६॥
काशाभा काशिका काशी काश्मीरचन्दनार्चिता ॥
वंशीकरप्रिया वंशी वंशीवादनहर्षिता ॥१३७॥
वंशीकरा कृष्णवंशी वंशीनादविमोहिता ॥
वंशीरूपरवाकारी वंशीराग मनोहरा ॥१३८॥

वंशीनादेन संहृष्टा वशीध्वन्यनुकारिणी ॥
वंशीवश्योर्वशीभ्राता वंशीवंशनिपालिका ॥१३९॥
श्रुतिस्मृतिप्रिया प्रह्वी श्रुतिस्मृत्यर्थरूपिणी ॥
श्रुतिस्मृतिसदाचारा श्रुतिस्मृत्यर्थवाचिका ॥१४०॥
श्रुतिस्मृतिरता कान्ता श्रुतिस्मृत्यर्थपूरणा ॥
श्रुतिः स्मृतिस्तथा तुष्टिः पुष्टिः कर्तुर्महाबला ॥१४१॥
प्रह्लादिनी जगन्माता प्रह्लादभक्तिवर्द्धिनी ॥
हिरण्यकशिपुच्छेत्त्री प्रह्लादानन्दकारिणी ॥१४२॥

हिरण्याक्षवधोद्युक्ता वाराही प्रीतिमानसा ॥
राक्षसानां क्षयकरी देवतानां जयावहा ॥१४३॥
बलिप्रिया सदा स्वेक्ष्या बलिनां बलदा बला ॥
बलासुरहरा वल्ली बलिभुग्बलघातिनी ॥१४४॥
राजनीतिः क्रिया रूपा राज्यहा राज्यभक्षणा ॥
राजराजैः स्तुता स्तुत्या स्तवनीयगुणा सती ॥१४५॥
षडूमिर्हारिणी षड्भा षड्गुणा त्रिगुणालया ॥
निष्कामधर्मनिरता सकामा कामनिर्मला ॥१४६॥

आर्या दाक्षिण्यरूपा च दक्षिणा यज्ञपावनी ॥
दक्षिणागमविद्या च दक्षिणानां वशंवदा ॥१४७॥
मुद्रा मुद्राप्रिया मुद्राविधानज्ञा मुदान्विता ॥
निष्कलङ्का कलाधारा सूर्यचन्द्राग्निलोचना ॥१४८॥
दुर्गा दुर्गगतिदुर्गासुरमारणपण्डिता ॥
त्वगस्थिमांसरुधिरस्नायुमज्जादिशक्तिदा ॥१४९॥
ग्रहरूपा ग्रहमयी विग्रहा ग्रहिका निशा ॥
ग्रहाणा ग्राहिणी ग्राम्यग्राहिणी ग्रामवल्लभा ॥१५०॥

ग्रामाचारपरा पूज्या ग्रामशर्माधिदायिनी ॥
सुभद्रा भद्रकाली च भद्रमार्गप्रवर्तिका ॥१५१॥
भद्रासना भद्रमतिभद्राङ्गा भद्रकारिणी ॥
पृथिव्यप्तेजसां रूपा चाद्याकाशस्वरूपिणी ॥१५२॥
काव्यशक्तिः कवित्वज्ञा कविरूपा कविप्रिया ॥
शिवा शिवङ्करी कम्बुकण्ठी सर्वाङ्गसुन्दरी ॥१५३॥
भक्तोद्गीता भक्तकाम्या भक्तसर्वस्वदा सती ॥
रजो रजोयुता रक्ता रजसःशुद्धिसाधिका ॥१५४॥

सत्त्वा च सत्त्वसम्पन्ना सत्त्वगुण्या गुणालया ॥
सात्त्विकी सत्त्वसंपूर्णा सत्त्ववृत्तान्तवृत्तिदा ॥
सत्त्वाहारा सत्त्वयोनिः सत्त्ववर्णाधिनन्दिनी ॥१५५॥
सर्वशास्त्रमयी विद्या सर्वदेवमयी प्रभा ॥
सर्ववर्णमयीशय्या सर्वाभरणभूषिता ॥१५६॥
सर्वसामर्थ्यदात्री च सर्वमङ्गलमालिनी ॥
सर्वाश्रया सार्वभौमा सर्वरूपागमप्रभा ॥१५७॥

गान्धर्वी किन्नरी देवी मोहकर्त्री सुबुद्धिदा ॥
लज्जाशीला त्रपाशीला शीलसन्तोषसंयुता ॥१५८॥
कामाक्षी कामिनी काम्या कमनीयवपुर्धरा ॥
कामरूपा सिद्धिरूपा सिद्धैर्वन्द्या सुसिद्धिदा ॥१५९॥
श्रीर्विद्या त्रिजटा देवी लक्ष्मीर्नीलसरस्वती ॥
पीताम्बरा तथाद्या च सर्वविद्यामयीश्वरी ॥१६०॥
व्यक्ताऽव्यक्ताऽनेकमूर्तिः सर्वतीर्थफलाधिका ॥
श्रीरूपा श्रीस्तुता श्राव्या श्रवणात्पापनाशिनी ॥१६१॥

सर्वधर्मवदान्या च निन्दानिन्दकनाशिनी ॥
श्रीप्रसादकरी श्रद्धा मेधारूपा सुशर्मदा ॥१६२॥
गोपी गिरिसुता गुर्वी गौरी गौः सर्वतोमुखी ॥
चतुर्भुजा दशभुजा चतुर्वर्गफलप्रदा ॥१६३॥
चर्मण्वती वेदवती चतुरा चातुरी कला ॥
षोडशाधिसहस्राणां स्त्रीणां मध्ये तु वन्दिता ॥१६४॥
नवमी पञ्चमी भूता षष्ठी षष्ठी च सप्तमी ॥
अमाच पूर्णिमा पूर्णा शिवरात्रिः प्रभावती ॥१६५॥

चतु:षष्टिकलायुक्ता षोडशी त्रिपुरेश्वरी ॥
सर्वप्राणमयी वन्द्या दृढबन्धविमुक्तिदा ॥१६६॥
सर्वाधारा सर्वदेवी सर्वाराध्या समालिका ॥
मन्त्रबीजरहस्यादिसर्वविद्याप्रकाशिनी ॥१६७॥
सर्ववर्णमयीन्द्राणी जपजाप्यपरा च सा ॥
श्रीधरी श्रीधरावन्द्या श्रीधरप्राणवल्लभा ॥१६८॥
श्रीराधा श्रीकृष्णहृदया श्रीधरप्राणजीवनी ॥
श्रीधरस्य प्रतापादिशापिकाखिलकारणम् ॥१६९॥

सर्वानुस्यूतशक्तिश्च बृहद्वृन्दवनालया ॥
इतीदं राधिकादेव्या दिव्यं नामसहस्रकम् ॥
मया सम्यक्तया प्रोक्तमृषे त्वद्धितकाम्यया ॥१७०॥
यः पठेत् प्रातरुत्थाय शुचिस्तद्गतमानसः ॥
स भवेत्सर्वसंपूर्णः शुभाचारः परात्परः ॥१७१॥
प्रज्ञाचक्षुर्लभेद्दृष्टिं नेत्ररोगैर्न पीड्यते ॥
मूको वाचं लभेत्सर्वलक्षणैः संयुता शुभाम् ॥१७२॥

प्रातःकालेथ सायाह्ने निशीथे यः पठेत्स्तवम् ॥
श्रीराधाकृष्णसाक्षात्कारो जायते निश्चितम् ॥१७३॥
वैष्णवेषु भवेद्धन्यस्त्रिषु लोकेषु विश्रुतः ॥
धर्मकर्तुषु धर्मीशः पठेद्यः स्तोत्रमुत्तमम् ॥१७४॥
स योगी परमोत्कृष्टः स ऋषिः सर्ववेदवित् ॥
स ज्ञानी स च भक्तस्तु स कर्मसकलार्थवित् ॥१७५॥
स इन्द्रः स हरिर्ब्रह्मा स रुद्रो ब्रह्मरूपवित् ॥
स शेषः स मुनिर्व्यासो दत्तात्रेयः सदाशिवः ॥१७६॥

प्रातरुत्थाय योऽधीते नाम्नां दशशतीमिमाम् ॥
सर्वतीर्थेषु यत्स्नानं सर्वलोकेषु यद्धितम् ॥१७७॥
सर्ववेदेषु यत्सर्वं सर्व स्मृतिषु यत्फलम् ॥
पुराणेषु च शास्त्रेषु तथा गीतप्रहेलिषु ॥१७८॥
यत्सारं यच्च हार्दं तु या शक्तिः सर्पदस्युहत् ॥
तत्सर्वमिदमाख्यातं नातः किञ्चित्परं मुने ॥१७९॥
धन्यं यशस्यमायुष्यं श्रीकृष्णप्रेमवर्द्धनम् ॥
इदमेकं मया दृष्टं राधानामसहस्रकम् ॥१८०॥

सर्वपापप्रशमनमकालमृत्युनाशनम् ॥
सर्वमाङ्गल्यदमिदं पठितव्यं मुमुक्षिभिः ॥१८१॥
सर्वागमप्रियं ह्येतत् सर्वपापप्रणाशनम् ॥
सर्ववेदशिरोभागे सर्वाधिव्याधिशान्तिकृत् ॥१८२॥
भावुकं भव्यसाधूनां तारकं तत्त्वमीक्षताम् ॥
मारकं सर्वदुष्टानामिदमेव हि निर्मितम् ॥१८३॥
एतस्य पठनात्सद्योमुक्तिः स्यादनपायिनी ॥
भक्तिरप्यस्य श्रीकृष्णे राधया सहिते भवेत् ॥१८४॥

कृष्णवश्यकरं सम्यक् ज्ञानविज्ञानवर्द्धनम् ॥
बहु किं पठनादस्य मासैकेन महामुने ॥१८५॥
भक्तियुक्तो लभेज्ज्ञानं श्रद्धावांश्चेन्मुनिः पठेत् ॥
आयुरारोग्यमैश्वर्यं ज्ञानं वैराग्यसंयुतम् ॥१८६॥
यद्यदिष्टतमं लोके तत्तदाप्नोत्यसंशयम् ॥
महतां सङ्गतिकरं महद्भाग्योदयप्रदम् ॥१८७॥
महतां हि सदा सेव्यमिदमेव ह्युदाहृतम् ॥
वेदशास्त्रपुराणेभ्य इदमेव समुद्धृतम् ॥१८८॥

तस्मात्सर्वप्रयत्नेन राधानामसहस्रकम् ॥
भूताष्टम्याममायां च संक्रान्तौव्यतिपातके ॥१८९॥
सूर्यचन्द्रोपरागे च पठितव्यं शुभेप्सुभिः ॥
पठ्यमानमिदं स्तोत्रं श्रद्धया यः श्रृणोति च ॥१९०॥
सर्वाभीष्टेन संयुक्तो जायते राधिकाज्ञया ॥
एकादश्यां महारात्रौ द्वादश्यां ग्रहपर्वणि ॥१९१॥
पठतां श्रृणुतां पुंसां तेषां मुक्तिर्न दुर्लभा ॥
हिक्कारोगस्तथा छर्दिमूत्रकृच्छ्रं तथा ज्वरः ॥१९२॥

अतीसारस्तथा शूल आमवातादयोपि च ॥
अन्ये च बहवो रोगाः सन्निपातमुखा ऋषे ॥१९३॥
शान्तिं प्रयान्ति ते सर्वे स्तोत्रस्यास्य प्रभावतः ॥
स्तोत्रस्य पठनादस्य प्रह्लादः सिद्धतां गतः ॥१९४॥
युधिष्ठिरोऽथ भीष्मश्च जामदग्न्योद्धवौ तथा ॥
हरिश्चन्द्राम्बरीषौ च ब्रह्मपुत्रास्तथाऽनघाः ॥१९५॥
एते सिद्धिं गताः सर्वे सत्यं सत्यं वदाम्यहम् ॥
श्रीराधायाः प्रसादेन सर्वानुग्रहणे क्षमः ॥१९६॥

तस्मात्सदेयमेवात्र पूजनीया मुहुर्मुहुः ॥
अथास्य साधनं वक्ष्ये उभयोः प्रीतिवर्द्धनम् ॥१९७॥
प्रातरुत्थाय कर्त्तव्यं साधकेन शुभेच्छुना ॥
प्रक्षाल्य हस्तौ पादौ च त्रिराचम्य शुचिः पुमान् ॥१९८॥
जलाशये तथा नद्यां देवखाते ह्रदे तथा ॥
कूपे गृहे स्वकीये वा स्नायाद्वै विधिपूर्वकम् ॥१९९॥
सदाचारं ततः कृत्वा पुष्पधूपादिचन्दनैः ॥
पुस्तकं तु प्रपूज्याथ मन्त्रराजमुदीरयेत् ॥२००॥

(अथ मन्त्रं प्रवक्ष्यामि विष्णुभक्तिकरं नृणाम् ॥
तारं रमानाथसैवतग: यदि मुदीर्य च ॥२०१॥
प्रपञ्चमो भगाद्याश्च भक्तिं देहि ततः परम् ॥
देहि देहि ततः पश्चात्तारं तत्र पुनर्वदेत्) ॥२०२॥
संप्रोक्तो मन्त्रराजोऽयं श्रीराधाया ऋषे तव ॥
दशवारमसौ मन्त्रो जप्यश्च प्रथमं मुदा ॥२०३॥
ततः सहस्रं नामेदं पठितव्यं मुने त्वया ॥
एककालस्य पठनाद्विष्णुभक्तो भवेद्यदि ॥२०४॥

द्वित्रिकालस्य पठनाद्भक्तिः स्यादनपायिनी ॥
एकोऽद्वयात्मको मन्त्रस्त्रिषु लोकेषु दुर्लभः ॥२०५॥
गोपनीयः प्रयत्नेन कृष्णस्य पदमिच्छता ॥
एकोऽद्वयात्मको मन्त्रस्तुभ्यमुक्तो मया मुने ॥
तस्मात्त्वयाऽपि धूर्तेभ्यः स न देयः कदाचन ॥२०६॥
इदं खलाय पशवे वेदानां निन्दकाय च ॥
अश्रद्धायातिमूर्खाय परस्त्रीलम्पटाय च ॥२०७॥

दुराचाराय मूढाय गीलायाव्रतरूपिणे ॥
निर्दयायातिह्रस्वाय नास्तिकायात्मघातिने ॥२०८॥
नैव देयं स्तोत्रमिदं न प्रकाश्यं सुदुर्लभम् ॥
ददातीदं य एतेभ्यः शिवहा स निगद्यते ॥२०९॥
भक्ताय भक्तियुक्ताय सर्वभूतदयालवे ॥
शमदमादियुक्ताय स्वच्छान्तःकरणाय च ॥२१०॥
गुरुपूजापरायाथ श्रद्धाचारयुताय च ॥
चिद्विलग्नाय योग्याय मुद्रामालाधराय च ॥२११॥

जितक्रोधाय शान्ताय विष्णुव्रतपराय च ॥
अन्यैरपि गुणैः शश्वत् तितिक्षाक्षान्तिरार्जवैः ॥२१२॥
युक्ताय साधकायाथ देयं स्तोत्रमिदं मुदा ॥
नन्वीदृशाय भक्ताय यो ददाति शुभं त्विदम् ॥२१३॥
स वै पुण्यतमो लोके तत्परो नैव कश्चन ॥
तस्मान्मुनेऽत्र विख्यातं मया त्वद्धितकाम्यया ॥२१४॥
इदं पठस्व च शृणु यदीच्छसि हरिं प्रभुम् ॥
एतस्य पठनाद्देवः कृष्णस्ते संप्रसीदति ॥२१५॥

अथ किं बहुनोक्तेन वर्णनेन पुनः पुनः ॥
वशयेद्राधिकाकृष्णौ नित्यं पाठकरः पुमान् ॥२१६॥

॥ इति श्रीरुद्रयामले शिवनारद संवादे शिवप्रोक्तं श्रीराधासहस्रनाम स्तोत्रं सम्पूर्णम् ॥

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर, मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५, फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डिंग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS